# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2022-23

## SANACOR01T-SANSKRIT (CC1)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks*
*Candidates should answer in their own words and adhere to the word limit as practicable*

### SECTION-A

1. अधोलिखितेषु पञ्चानां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम्। 2×5 = 10

(क) किं तावत् रघुवंशस्य उत्सभूत महाकाव्यम् ? अस्य महाकाव्यस्य रचयिता कः ?

(ख) रघुवशस्य प्रसिद्धा टीका का ? को वा तस्याः टीकायाः रचयिता ?

(ग) दिलीपः कः ? तस्य कायाकारः कथमासीत् ?

(घ) दिलीपः कथं प्रजाना पितृपद प्राप्तवान् ?

(ङ) 'प्रणवश्छन्दसामिव'– प्रणवः को भवति ? कस्मिन् प्रसङ्गे कविना एवमुक्तम् ?

(च) 'क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः'– इत्यत्र क्वद्वयेन किं ज्ञायते ?

(छ) दिलीपचरित्रस्य परस्परविरुद्धगुणा विव्रियन्ताम्।

### SECTION-B

2. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) शिवलाभाय पार्वत्याः कठोरं तपः कुमारसम्भवमाश्रित्य वर्ण्यताम्।

(ख) 'उपमा कालिदासस्य'– इत्युक्तेः तात्पर्यं कुमारसम्भवमिति महाकाव्यस्य पञ्चमसर्गमाश्रित्य लिख्यताम्।

3. अधोलिखितयोः एकस्य श्लोकस्य संस्कृतेन देवनागर्या च व्याख्या लेख्या। 5×1 = 5

(क) मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः॥

(ख) महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते।
अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले॥

## SECTION-C

4. यथाभितं प्रश्नस्य एकस्योत्तरं प्रदेयम् – 10×1 = 10

(क) वनेचरः कः ? वनेचरवचनमनुसृत्य दुर्योधनस्य राज्यशासनपद्धतिः लेख्या।

(ख) 'भारवेरर्थगौरवम्'– इति उक्तेः तात्पर्यं किरातर्जुनीयमिति महाकाव्यस्य प्रथमसर्गमाश्रित्य वर्ण्यताम्।

5. अधोलिखितयोः एकस्य श्लोकस्य संस्कृतेन देवनागर्या च व्याख्या लेख्या – 5×1 = 5

(क) क्रियासुयुक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥

(ख) कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः॥

## SECTION-D

6. अधोलिखितेषु विषयद्वयमाश्रित्य संस्कृतेन देवनागर्या च टीका लेख्या। 5×2 = 10

नैषधचरितम्, भट्टिकाव्यम्, मेघदूतम्, रघुवंशम्।

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2022-23

## SANACOR02T-SANSKRIT (CC2)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु यथेच्छम् एकः प्रश्नः समाधेयः। — 10×1 = 10

(क) किं नाम संवादसूक्तम् ? ऋग्वेदस्य संवादसूक्तानि आश्रित्य कश्चन निबन्धो लेख्यः। — 2+8

(ख) कति वेदाङ्गानि ? कानि च तानि ? तद्विषये नातिदीर्घः प्रबन्धो लेख्यः। — 1+2+7

(ग) ईशोपनिषदः प्रतिपाद्यविषयः सोद्धृति व्याख्यायताम्। — 10

2. अधोलिखितेषु विषयमेकमाश्रित्य संस्कृतेन देवनागर्या च लघुनिबन्धो विरचनीयः। — 5×1 = 5

(क) शतपथब्राह्मणम्।

(ख) त्रयी।

(ग) सायणाचार्य्यः।

### SECTION-B

3. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः – — 2×5 = 10

(क) किं नाम पुराणम् ?

(ख) उपपुराणानि कति ? कानि च तानि ?

(ग) तामसपुराणानि कानि ?

(घ) पुराणस्य प्रवक्तृरूपेण कः प्रसिद्धः ? क्षुद्रपुराणस्य नाम किम् ?

(ङ) नाट्यशास्त्रस्य लक्षणं कस्मिन् पुराणे उपलभ्यते ? किं पुराणमाश्रित्य अभिज्ञानशकुन्तलमिति नाटकं कालिदासेन विरचितम् ?

(च) पुराणाश्रितस्य महाकाव्यद्वयस्य नाम लेख्यम्।

(छ) विष्णोः कति अवताराः सन्ति ? के च ते ?

4. अध:प्रदत्तेषु यथेच्छं विषयद्वयमाश्रित्य संस्कृतेन देवनागरलिप्या च टीका लिखत।

(क) विष्णुपुराणम्।

(ख) अग्निपुराणम्।

(ग) लिङ्गपुराणम्।

## SECTION-C

5. अधोलिखितेषु यथेच्छमेकः प्रश्न समाधेयः। 10×1 = 10

(क) भारतीयदर्शनमाश्रित्य मुक्तितत्त्वं समासेन प्रतिपादयतम्।

(ख) अलंकारशास्त्रस्य रीतिप्रस्थानम् आश्रित्य कश्चन लघुनिबन्धो लेख्यः।

(ग) व्याकरणशास्त्रस्य मुनित्रयस्य परिचयो देयः।

6. अधोलिखितेषु विषयमेकमाश्रित्य संस्कृतेन देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(क) सत्कार्यवादः।

(ख) माया।

(ग) महाभाष्यम्।

——×——

## WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2021-22

# SANACOR01T-SANSKRIT (CC1)

Time Allotted: 2 Hours　　　　Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु <u>पञ्चानां</u> प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्। 2×5 = 10

(क) जगतः पितरौ वन्दे—जगतः पितरौ कौ भवतः ? तयोः तुलना काभ्यां सह क्रियते ?

(ख) 'स ताभ्यो वलिमग्रहीत्'—स कः आसीत् ? तस्य करसंग्रहनीतिः कीदृशी च आसीत् ?

(ग) सूर्यवंशस्य प्रथमः राजा कः आसीत् ? इक्ष्वाकुः कः आसीत् ?

(घ) हेम्नः शुद्धिः श्यामिका वा केन परीक्ष्यते ?

(ङ) दिलीपस्य मन्त्रणा कीदृशी आसीत् ?

(च) राज्ञः दिलीपस्य चरित्रस्य गुणद्वयं लेख्यम्।

(छ) 'यादोरत्नैरिवार्णवः'-उद्धृतेः कोऽर्थः ?

### SECTION-B

2. यथाभिमतं प्रश्नस्य <u>एकस्योत्तरं</u> समाधेयम् – 10×1 = 10

(क) पार्वत्याः तपश्चरणं संक्षेपेण विव्रियताम्।

(ख) कुमारसम्भवस्य पञ्चमसर्गस्थं भवत्पाठ्यक्रममाश्रित्य कालिदासस्य रचनाशैली लिख्यताम्।

3. अधोलिखितयोः कस्यचित् <u>एकस्य</u> संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या। 5×1 = 5

(क) तथा समक्षं दहता मनोभवॉं पिनाकिना भग्नम       ती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफ... ..   .रुता॥

(ख) इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥

## SECTION-C

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं लेख्यम् –

(क) 'स सौष्ठवौदार्यविशषशालिनीं विनिश्चितार्थामिति वाचमाददे'– इदं कविवचनमनुसृत्य वनेचरोक्तिः विचार्यताम्।

(ख) 'नारिकेलफलसम्मितं वचो भारवेः'–इत्यस्य वचनस्य सार्थक्यं किरातर्जुनीयमहाकाव्यस्य प्रथमसर्गान्तर्गतं पाठ्यांशमनुसृत्य लिख्यताम्।

5. यथेच्छमेकस्य श्लोकस्य संस्कृतभाषया देवनागरीलिप्या च व्याख्या क्रियताम् – 5×1 = 5

(क) कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवुक्तमिच्छन्ति मृषा हितैषिणः॥

(ख) स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकुलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥

## SECTION-D

6. अधोलिखितानां विषयाणां द्वयमधिकृत्य संस्कृतभाषया देवनागरीलिप्या च टिप्पणी रचनीया– 5×2 = 10

पवनदूतम्, गीतगोविन्दम्, भर्तृहरिः, माघः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within* 1 *hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2021-22

## SANACOR02T-SANSKRIT (CC2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु यथेच्छम् एकः प्रश्नः समाधेयः। 10×1 = 10

(क) किं नाम दार्शनिकसूक्तम् ? ऋग्वेदस्य दार्शनिकसूक्तानि आश्रित्य कश्चन निबन्धो लेख्यः। 2+8

(ख) किं नाम ब्राह्मणसाहित्यम् ? ब्राह्मणसाहित्यस्य प्रतिपाद्यविषयान् समासेन लिखत। 2+8

(ग) उपनिषच्छब्दस्य कोऽर्थः ? उपनिषत्सु प्रतिपादितमात्मतत्त्वमाश्रित्य कश्चन निबन्धो विरचनीयः। 2+8

2. अधोलिखितेषु विषयमेकमाश्रित्य संस्कृतेन देवनागरलिप्या च लघुनिबन्धो विरचनीयः। 5×1 = 5

(क) यजुर्वेदः।

(ख) आरण्यकम्।

(ग) निरुक्तम्।

### SECTION-B

3. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) महापुराणानि कति ? कानि च तानि ?

(ख) पुराणेतिहासयोः को भेदः ?

(ग) मन्वन्तरं किम् ?

(घ) पुराणाश्रितस्य नाटकद्वयस्य नाम लिख्यताम्।

(ङ) कानि राजसपुराणानि ?

(च) महायज्ञाः कतिविधः ? के च ते ?

(छ) पुराणेषु सर्ववृहत्पुराणं किमस्ति ? अत्र कति श्लोकाः सन्ति ?

4. अधःप्रदत्तेषु यथेच्छं विषयद्वयमाश्रित्य संस्कृतेन देवनागरलिप्या च टीकां लिखता।

(क) पद्मपुराणम्

(ख) स्कन्दपुराणम्

(ग) वायुपुराणम्।

## SECTION-C

5. अधोलिखितेषु यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) भारतीयालङ्कारशास्त्रानुसारं रसप्रस्थानमाश्रित्य कश्चन लघुनिबन्धो लेख्यः।

(ख) सांख्यप्रतिपादितं सृष्टितत्त्वं समासेन व्याख्यायताम्।

(ग) व्याकरणशास्त्रेषु महाभाष्यस्य गुरुत्वं वैशिष्ट्यं च समासेन प्रतिपाद्यताम्।

6. अधोलिखितेषु विषयमेकमाश्रित्य संस्कृतेन देवनागरलिप्या च टीकां लिखत। 5×1 = 5

(क) सांख्यमते पुरुषः

(ख) देहात्मवादः

(ग) अष्टाध्यायी।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within* 1 *hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2020, held in 2021

## SANACOR01T-SANSKRIT (CC1)

Time Allotted: 2 Hours　　　　Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः　　2×5 = 10

(क) रघुवंशमिति महाकाव्यस्य रचयिता कः ? महाकाव्यस्य मङ्गलश्लोके कयोः स्तुतिरस्ति ?

(ख) रघुवंशस्य प्रसिद्धा टीका का ? को वा रचयिता ?

(ग) रघुवंशः अन्येन केन नाम्ना परिचितः ?

(घ) दिलीपः कः आसीत् ? तस्य कायाकारः कीदृश आसीत् ?

(ङ) दिलीपः कथं प्रजाभ्यः करं गृह्णाति स्म ?

(च) 'आजन्मशुद्धानाम्' इत्यादिषु 'आङ्' इत्युपसर्गस्य कोऽर्थः ?

(छ) 'प्रणवश्छन्दसामिव'— प्रणवः कः भवति ?

### SECTION-B

2. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम् –　　10×1 = 10

(क) 'कुमारसम्भवम्' इति महाकाव्ये शिवलाभाय पार्वत्याः तपस्या वर्ण्यताम्।

(ख) महाकाव्यरूपेण 'कुमारसम्भवम्' इत्यस्य विचारः क्रियताम्।

3. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्या क्रियताम् –　　5×1 = 5

(क) मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः॥

(ख) स्वयं विशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः॥

## SECTION-C

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं लेख्यम् –

(क) वनेचरः कः ? युधिष्ठिरं प्रति उक्तं तस्य वचनम् आलोच्यताम्।

(ख) 'भारवेरर्थगैरवम्' इति किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गान्तर्गतं पाठ्यांशमनुसृत्य सोदाहरणं लिख्यताम्।

## SECTION-D

5. यथेच्छमेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्या क्रियताम् – 5×1 = 5

(क) क्रियासु युक्तैर्नृपचारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥

(ख) सुखेन लभ्या दधतः कृषीबलैरकृष्टपच्या इव शस्यसम्पदः।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति॥

## SECTION-E

6. अधोगतेषु विषयद्वयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टीका लिख्यताम्। 5×2 = 10
बुद्धचरितम्, जानकीहरणम्, मेघदूतम्, अमरुशतकम्।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within* 1 *hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2020, held in 2021

## SANACOR02T-SANSKRIT (CC2)

Time Allotted: 2 Hours                                                                                    Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु एकः प्रश्नः समाधेयः                                                                                    10×1 = 10

(क) कि नाम धर्मनिरपेक्षसूक्तम् ? धर्मनिरपेक्षसूक्तान्याश्रित्य कश्चन प्रबन्धो लेख्यः।

(ख) वेदाङ्गस्य लक्षणं किं भवति ? वेदाङ्गान्याश्रित्य कश्चन निबन्धो विरचनीयः।

(ग) अथर्ववेदस्य विषयमवलम्ब्य कश्चन निबन्धो लेख्यः।

### SECTION-B

2. अधोलिखितेषु विषयमेकमाश्रित्य संस्कृतेन देवनागरलिप्या च लघुनिबन्धो विरचनीयः।                                                                                    5×1 = 5

(क) ऐतरेयब्राह्मणम्

(ख) सामवेदसंहिता

(ग) शौनकः।

### SECTION-C

3. निम्नलिखितेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः।                                                                                    2×5 = 10

(क) पुराणशब्दस्य कोऽर्थः ?

(ख) पुराणेषु केषां देवानां प्राधान्यं वर्णितम् ?

(ग) तामसपुराणानि कानि ?

(घ) गुणाः कतिविधा भवन्ति ?

(ङ) पुराणसाहित्यस्य उत्सस्थलं किम् ?

(च) सृष्टिः कतिविधा ?

(छ) पुराणानां रचयिता कः ?

## SECTION-D

4. अधोलिखितेषु विषयद्वयमाश्रित्य संस्कृतेन देवनागरलिप्या च लघुनिबन्धो विरचनीयः।

(क) पुराणलक्षणम्

(ख) विष्णुपुराणम्

(ग) अग्निपुराणम्।

## SECTION-E

5. अधोलिखितेषु एकः समाधेयः। $10\times1 = 10$

(क) पाणिनीयव्याकरणशास्त्रस्येतिहासः समासेन वर्णनीयः।

(ख) न्यायदर्शने प्रमाणमवलम्ब्य कश्चन निबन्धो लेख्यः।

(ग) भारतीयालङ्कारशास्त्रानुसारं गुणप्रस्थानमाश्रित्य कश्चन निबन्धो विरचनीयः।

## SECTION-F

6. अधोलिखितेषु विषयमेकमाश्रित्य संस्कृतेन देवनागरलिप्या च लघुनिबन्धो विरचनीयः। $5\times1 = 5$

(क) महाभाष्यम्

(ख) अनेकान्तवादः

(ग) आनन्दवर्धनः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within* 1 *hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY
B.A. Honours 1st Semester Examination, 2019

## SANACOR01T-SANSKRIT (CC1)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्चप्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः 2×5 = 10

(क) 'रघुवंशम्' कीदृशं काव्यम् ? तस्मिन् काव्ये कियन्तः सर्गाः सन्ति ?

(ख) 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य नाम किमस्ति ?

(ग) रविः कथं पृथिवीरसं गृह्णाति ?

(घ) सूर्यवंशस्य प्रथमः राजा कः आसीत् ? इक्ष्वाकु कः आसीत् ?

(ङ) 'क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः' – सूर्यप्रभवः वंशः कः ? अल्पविषया मतिः कस्य ?

(च) 'स पिता पितरस्तासां केवलं जन्महेतवः' – अत्र कः कस्य पिता ?

(छ) रघुवंशमिति महाकाव्यस्य प्रसिद्धा टीका का ? को वा रचयिता ?

(ज) 'तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः' – इत्यत्र कस्य पवित्रस्य वंशस्य कथनम् अस्ति ? तस्मिन् वंशे कः जन्म प्राप्तवान् ?

### SECTION-B

2. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम् – 10×1 = 10

(क) कुमारसम्भवमिति महाकाव्यस्य पाठ्यांशमनुसृत्य महाकवेः कालिदासस्य कवित्त्वम् विचारयतु।

(ख) पार्वत्याः मातुर्नाम किम् ? कथं पार्वती तपस्यां कृतवती ? कथं सा पार्वतीं तपसः निवारयितुं चेष्टितवती – सोदाहरणं लिख्यताम्। 1+2+7=10

3. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत – 5×1 = 5

(क) इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥

(ख) निशम्य चैनां तपसे कृतोद्यमां सुतां गिरिशप्रतिसक्तमानसाम्।
उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात्॥

## SECTION-C

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं प्रदेयम् –

(क) कपटपाशाक्रीडया युधिष्ठिरात् प्राप्तं राज्यं स्वायत्तीकर्तुं दुर्योधनः यासां नीतिनां प्रयोगं कृत ताः स्वभाषयावर्णयत।

(ख) 'नारिकेलफलसम्मितं वचो भारवेः' – इति किरातार्जुनीयाख्यस्य महाकाव्यस्य प्रथमसर्गान्तर्गत पाठ्यांशमनुसृत्य सोदाहरणं विचारयत।

## SECTION-D

5. यथेच्छमेकस्य श्लोकस्य संस्कृतेन देवनागरीलिपया च व्याख्या क्रियताम् – 5×1 = 5

(क) स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते सः किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥

(ख) कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद्व्यथते नताननः सः दुः सहान्मन्त्रपदादिवोरगः॥

## SECTION-E

6. अधोगतेषु विषयद्वयमाश्रित्य संस्कृतेन देवनागरीलिपया च टीका लिख्यताम्। 5×2 = 10

गीतगोविन्दम्, वैराग्यशतकम्, नैषधचरितम्, रघुवंशम्।

——×——

लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2019

## SANACOR02T-SANSKRIT (CC2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु यथेच्छम् एकः प्रश्नः समाधेयः $10\times1 = 10$

(क) किं नाम दार्शनिकसूक्तम् ? दार्शनिकसूक्तानि आश्रित्य कश्चन निबन्धी लेख्यः। $1\frac{1}{2}+8\frac{1}{2}$

(ख) अथर्ववेदस्य विषयमवलम्ब्य कश्चन निबन्धो लेख्यः। के तावत् सन्ति अथर्ववेदस्य उपनिषद्ग्रन्थाः ? 7+3

(ग) ऋग्वेदस्य समाजव्यवस्था कीदृशी आसीत् ? प्रसङ्गेऽस्मिन् वैदिकसमाजे नारीणां स्थानं वर्णनीयम्। 6+4

### SECTION-B

2. अधोनिर्दिष्टेषु विषयम् एकम् आश्रित्य संस्कृतेन देवनागरीलिप्या लघुनिबन्धो विरचनीयः $5\times1 = 5$

(क) ऐतरेयब्राह्मणम्, (ख) कल्पः, (ग) तैत्तिरीयारण्यकम्।

### SECTION-C

3. अधोलिखितेषु पञ्च प्रश्नाः समाधेयाः (संस्कृतेन देवनागरीलिप्या च) $2\times5 = 10$

(क) पुराणस्य लक्षणं किम् ?

(ख) राजसपुराणानि नाम कानि ?

(ग) महायज्ञः कतिविधः के च ते ?

(घ) पुराणेषु बृहत्पुराणस्य नाम किम् ?

(ङ) उपपुराणानि कानि ?

(च) कः खलु पुराणकर्ता ?

(छ) 'व-चतुष्टयम्' किम् ?

4. अधोलिखितेषु यथेच्छम् विषयद्वयम् आश्रित्य लघुनिबन्धः रचनीयः (संस्कृतेन देवनागरीलिप्या च) 5×2 = 10

(क) ब्रह्मपुराणम्, (ख) पद्मपुराणम्, (ग) पुराणानां रचनाकालः।

## SECTION-E

5. अधो-गतेषु यथेच्छम् एकः प्रश्नः समाधेयः। 10×1 = 10

(क) भाष्यलक्षणं किम् ? महाभाष्यस्य रचयिता कः ? महाभाष्यस्य सामान्यं विवरणं प्रदेयम्।

(ख) भारतीयदर्शने आत्मनः स्वरूपविषये विविधानि मतानि आलोचय।

(ग) भारतीयालङ्कारशास्त्रानुसारं रीतिप्रस्थानम् आश्रित्य कश्चन निबन्धो लेख्यः।

## SECTION-F

6. अधोलिखितेषु एकं विषयमाश्रित्य लघुनिबन्धः रचनीयः (संस्कृतेन देवनागरीलिप्या च) 5×1 = 5

(क) सांख्यमते प्रकृतिः, (ख) काशिका, (ग) रसगङ्गाधरः।

——×——

लक्ष्यं विद्यामानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2018

## SANACOR01T-SANSKRIT (CC1)

## CLASSICAL SANSKRIT LITERATURE (POETRY)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्चप्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः – 2×5 = 10

(क) प्रणवश्छन्दसामिव – कः तावत् प्रणवः ? कस्मिन् प्रसङ्गे कविना एवमुक्तम्।

(ख) किं तावत् रघुवंशस्य उत्सभूतं महाकाव्यम् ? अस्य महाकाव्यस्य कः रचयिता ?

(ग) परस्परविरुद्धाः गुणाः दिलीपे केन प्रकारेण सहावस्थायिनः भवन्ति ?

(घ) दिलीपस्य मन्त्रणा कीदृशी आसीत् ?

(ङ) दिलीपेन किम्प्रकारेण प्रजानां पितृपदं प्राप्तम् ?

(च) राज्ञः दिलीपस्य चरित्रस्य गुणत्रयम् उल्लिख्यताम्।

(छ) कौ जगतः पितरौ ? कालिदासेन तौ किमर्थं वन्दितौ आस्ताम् ?

(ज) "प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः" – किमत्र प्रांशुलभ्यं फलम् ? कश्च वामनः?

### SECTION-B

2. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) अभीष्टसिद्धये पार्वत्याः साधनमार्गः कीदृशः आसीत् ? कुमारसम्भवमहाकाव्यस्य पञ्चमसर्गमाश्रित्य लिख्यताम्।

(ख) कुमारसम्भवमिति महाकाव्यस्य पञ्चमसर्गमनुसृत्य प्रदर्श्यताम् – 'उपमा कालिदासस्य' इति।

3. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत – 5×1 = 5

(क) यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते॥

(ख) तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता॥

## SECTION-C

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं प्रदेयम्।

(क) 'स वर्णिलिङ्गी विदितः समाययौ' – कस्तावत् वर्णिलिङ्गी ? एवं वेशधारणस्य किं प्रयोजनम् ? अत्र वनेचरमुखेन वर्णितः दुर्योधनशासनवृत्तान्तः लिख्यताम्।

(ख) विशदीक्रियतां किरातार्जुनीयाख्यस्य महाकाव्यस्य प्रथमसर्गमाश्रित्य 'भारवेरर्थगौरवम्' इति।

## SECTION-D

5. यथेच्छमेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्या क्रियताम् – 5×1 = 5

(क) निरत्ययं साम न दानवर्जितं न भूरिदानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया॥

(ख) प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधिमण्डलं भुवः।
स चिन्तयत्येव भियस्तवदेष्यतीरहो दुरन्ता बलवद्विरोधिता॥

## SECTION-E

6. अधोगतेषु विषयद्वयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टीका लिख्यताम्। 5×2 = 10
मेघदूतम्, अमरुशतकम्, जानकीहरणम्, बुद्धचरितम्।

——×——

**WEST BENGAL STATE UNIVERSITY**

B.A. Honours 1st Semester Examination, 2018

## SANACOR02T-SANSKRIT (CC2)

### CRITICAL SURVEY OF SANSKRIT LITERATURE

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु यथेच्छम् <u>एकः</u> प्रश्नः समाधेयः। $10\times1 = 10$

(क) कति वेदाङ्गानि ? कानि च तानि ? वेदाङ्गानि आश्रित्य कश्चन निबन्धो लेख्यः। 1+1+8

(ख) किं नाम संवादसूक्तम् ? ऋग्वेदे कति संवादसूक्तानि सन्ति ? तेषुं संवादसूक्तेषु त्रितयस्यं विवरणं प्रदेयम्। 1.5+1+7.5

(ग) किं नाम ब्राह्मणम् ? ब्राह्मणमाश्रित्य कश्चन निबन्धो विरच्यः। 10

### SECTION-B

2. अधोनिर्दिष्टेषु विषयम् <u>एकम्</u> आश्रित्य संस्कृतेन देवनागरीलिप्या लघुनिबन्धो विरचनीयः। $5\times1 = 5$

(क) आरण्यकम्, (ख) सायणाचार्यः, (ग) शतपथब्राह्मणम्।

### SECTION-C

3. अधोलिखितेषु <u>पञ्च</u> प्रश्नाः समाधेयाः (संस्कृतेन देवनागरीलिप्या च) – $2\times5 = 10$

(क) भागवतपुराणस्य प्रवक्ता कः ?

(ख) देवीभागवते कति स्कन्धाः सन्ति ?

(ग) तामसपुराणानि कानि ?

(घ) सात्त्विकपुराणानि कानि ?

(ङ) पुराणशब्दस्य कोऽर्थः ?

(च) मन्वन्तरं किम् ?

(छ) पुराणेषु लघुपुराणं किम् ?

## SECTION-D

4. अधस्स्थेषु यथेच्छम् एकमाश्रित्य लघुनिबन्धः रचनीयः (संस्कृतेन देवनागरीलिप्या च) –

(क) पुराणलक्षणम्।

(ख) पुराणानां सामाजिकप्रभावः।

(ग) ऐतिहासिकदिशा पुराणानाम् पर्यालोचनाम्।

## SECTION-E

5. अधोलिखितेषु यथेच्छम् एकः प्रश्नः समाधेयः। $10\times1=10$

(क) पाणिनीयव्याकरणशास्त्रेतिहासः समासेन वर्णनीयः। 10

(ख) भारतीयदर्शनं कतिविधम् ? कार्यकारणभावविषये भारतीयदर्शनविचार उपस्थाप्यताम्। 2+8

(ग) भारतीयालङ्कारशास्त्रानुसारं रसप्रस्थानम् आश्रित्य कश्चन निबन्धो लेख्यः। 10

## SECTION-F

6. अधोलिखितेषु एकं विषयमाश्रित्य लघुनिबन्धः रचनीयः (संस्कृतेन देवनागरीलिप्या च) – 10

(क) पतञ्जलिः, (ख) वामनः, (ग) सांख्यसम्मतः पुरुषः।

——×——